# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3)   **प्रश्नपत्रम् – ७**   गुणाः - ७०

विषयः – फलितज्योतिषम्   **कोड – C.E.2.3.5**   समयः –०३:००-०६:००

दिनाङ्कः – ०१-१२-२०१६   सन्दर्भग्रन्थः – भारतीयकुण्डलीविज्ञानम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १   अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।**   ०८

(१) तिथिर्वासरनक्षत्रं योग: करणमेव च।
इति पञ्चाङ्गमाख्यातं व्रतपर्वनिर्दशकम् ॥

(२) चतुरंगबलो राजा जगतीं वशमानयेत्।
अहं पंचांगबलवानाकाशं वशमानये।

(३) गतैष्यदिवसाद्येन गतिर्निघ्नी खषडहृता।
लब्धमंशादिनां शोध्यं योज्यं स्पष्टो भवेद् ग्रहः।

**प्रश्नः – २   अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।**   ०८

(१) जन्मनक्षत्रानुसारं नामविचार:   (२) क्षयाधिकतिथे: परिचय:

**प्रश्नः – ३   निम्नलिखितेषु टिप्प्पणीद्वयं लिखत।**   ०४

(१) संवत्सरस्य उत्पत्ति:   (३) इष्टकालसाधनस्य प्रकारा:

(२) करणपरिचय:   (४) अयनांशानयनम्

**प्रश्नः – ४   अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।**   ०५

(१) चरकरणानि कानि ?   (५) भद्रा केषु तिथिषु भवति?

(२) ऋणचालनं कदा क्रियते?   (६) अयनांश: अर्थात् किम्?

(३) भयातशब्दस्य कोऽर्थ: ?   (७) दक्षिणायनं कदा भवति?

(४) हेमन्तऋतु: कदा भवति ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५   अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।।**   ०८

(१) तात्कालार्क: सायन: स्वोदयघ्ना   भोग्यांशा: खत्र्युद्धृता भोग्यकाल।
एवं यातांशै र्भवेद्यातकालो   भोग्य: शोध्योऽभीष्टनाडीपलेभ्य:॥

(२) ओजे नगांशा: स्यु: युग्मे ततो द्युनगृहाद्भवन्ति।

(३) कुजयमजीवज्ञसिता: पंचेन्द्रियवसुमुनीन्द्रियांशानाम्।
अयुजि युजि तु भे विपर्ययस्था:॥

**प्रश्नः – ६   अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।**   ०८

(१) विंशोपकबलानयनम्।

(२) भुक्तप्रकारेण लग्नानयनम्

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** **०४**

(१) भोग्यांशानायनम्

(२) चरखण्डस्य संस्कार: कथं क्रियते?

(३) राशिचक्रस्य उदाहरणम्

(४) दशमलग्नायने नतानयनम्

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** **०५**

(१) सायनसूर्यस्य साधनं कथं भवति ?

(२) एकस्मिन् सप्तमांशे कति अंशा भवन्ति ?

(३) नक्रशब्दस्य क: अर्थ: ?

(४) नतानयने कस्य प्रयोग: भवति ?

(५) त्रिंशांश: कति विभागात्मिका भवति?

(६) विषमहोराया: प्रथमभागस्य स्वामि: क: ?

(७) त्रिंशांशेसमराशौ प्रथमभागस्य अधिप: क: ?

**तृतीयान्विति: (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु कयोश्चिद् द्वयोःसप्रसङ्गं व्याख्यां कुरुत।।** **०८**

(१) शुक्रज्ञौ सुहृदौ सम: सुरगुरु: सौरस्य चान्येऽरय:।
तत्काले च दशायबन्धुसहजस्वान्त्येषु मित्रं स्थिता।। ॥

(२) अथोच्यते सप्तकवर्गचक्रं खगामिनां तदबलसाधनार्थम्।
बलं बिना खेटफलं न वक्तुं भावादिजातं च नर: क्षम: स्यात् ॥

(३) गुर्जरे कच्छसौराष्ट्रे पांचाले सिंधुपर्वते।
एतेष्वष्टोत्तरी श्रेष्ठाऽन्यत्र विंशोत्तरी मत्ता ॥

**प्रश्नः – १० अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** **०८**

(१) नैसर्गिकमैत्रीविचार:।

(२) अष्टकरेखाविचार:

**प्रश्नः – ११ निम्नलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखत** **०२**

(१) ग्रहाणां उच्चराशय:

(२) अभिजितदशासाधनम्

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत।** **०२**

(१) रश्मिशब्दस्य कोऽर्थ: ?

(२) सूर्यस्य नीचराशि: क: ?

(३) दशा कतिधा ?

(४) शुक्र: कस्य अधिप: ?

***